कालेनाभिप्रवर्द्धिताः ॥ दर्शयन्ति विकारांस्तु विश्वरूपाभिसर्गतः । अपस्मारो महाव्याधिस्तस्माद्दोषज एव तु" इति ॥ "धर्त्तोऽपस्माररोगी स्यादिति" शाता०कर्म्म० । "अपस्मारादिरोगाणां ज्वरादीनां विशेषत इति" वटुकस्तोत्रम् ।

**अपस्मारिन्** त्रि० अपस्मार+अस्त्यर्थे इनि । १ अपस्माररोगयुक्ते । स्त्रियां ङीप् ।

**अपस्य** त्रि० अपसि कर्म्मणि साधुः अपस्+यत् । १साधुकर्म्मकारिणि "अनाष्टष्टा अपस्योवसाना" इति "यजु० १०,७, अपस्याः अपसि कर्मणि साध्व्यः" वे०दी०। "अपरेण स्वयमातृण्णमित्यापस्याः पञ्च पञ्चानूकालेष्वपामिति" का० १७, ६,२, अपस्यास्तत्संज्ञका इष्टकाभेदा इति वेददी० ।

**अपस्यु** त्रि० अपः कर्मेच्छति अपस्+क्यच्–उ । १ कर्म्मेच्छौ "गिर यदी सबन्धवः पञ्चव्राता अपस्यव" इति ऋ०८,१४,२

**अपह** त्रि० अप+हन–"अपे क्लेशतमसोः" पा० ड । १अपघातकर्त्तरि । क्लेशापहः पुत्रः तमोऽपहः सूर्य्यः । योगविभागादन्यत्रापि "सुपरीक्षितमन्त्राद्यमद्यान्मन्त्रैर्विषापहैरिति" मनुः

**अपहत** त्रि० अप+हन–क्त । १विनाशिते "योऽयमात्माऽपहतपाप्मेति" श्रुतिः ।

**अपहति** स्त्री अप+हन–क्तिन् । १नाशने । "न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति" छा०उ० ।

**अपहर** त्रि० अप+हृ–कर्त्तरि अच् । १अपहरणकर्त्तरि "भद्रं भवेद्भवभयापहरं त्वलोके" इति हेमा०भवि०पु० ।

**अपहरण** न० अप+हृ–ल्युट् । १स्तेये साधारणस्य परकीयस्य वा धनादिचौर्य्ये। "सीताद्रव्यापहरणे शस्त्राणामौषधस्य चेति" "निक्षेपस्यापहरणं नरामूल्यरजतस्य चेति" "भक्ष्यभोज्यापहरणे यानशय्यासनस्य च" इति च मनुः स्तेयस्वरूपञ्च स्मृतौ दर्शितं यथा "उपायैर्विविधैरेषां छलयित्वापकर्षणम् सुप्तमत्त प्रमत्तेभ्यः स्तेयमाहुर्मनीषिण" इति नार०। "स्यात् साहसं त्वन्वयवत् प्रसभं कर्म्म यत् कृतम् । निरन्वयं भवेत् स्तेयं कृत्वापह्नूयते च यदिति" मनुः । "अन्वयवद् द्रव्यरक्षिराजाध्यक्षादिसमक्षं प्रसभं बलावष्टम्भेन यत् परधनहरणादिकं क्रियते तत् साहसं, स्तेयन्तु तद्विलक्षणं निरन्वयं द्रव्यस्वाम्याद्यसमक्षं वञ्चयित्वा यत् परधनहरणं तदुच्यते यच्च सान्वयमपि कृत्वा न मयेदं कृतमिति भयात् निह्नुते तदपि स्तेयमिति" मिताक्षरा । तच्च साधारणस्य परकीयस्य वा हरणम् "सामान्यद्रव्यप्रसभहरणात् साहसं स्मृतमिति" याज्ञ० उक्तेः । तथाच परकीये साधारणे वा द्रव्ये स्वत्व हेतुभूतलौकिकक्रयप्रतिग्रहादिकमन्तरेण स्वत्वापादनं हरणम् तदेव बलपूर्व्वकं साहसमिति भेद इति मिताक्षरादिमतम् दायभागमते तु साधारणद्रव्यस्य नापहरणं परमात्मस्वत्ववद्द्रव्यस्यैवापहरणमिति तन्मोक्तेरिति विशेषः । २बलादपकर्षणे च । "निर्विंशोऽतिममत्वेन राज्यापहरणेन चेति" देवी मा० ।

**अपहरणीय** त्रि० अपहर्त्तुमर्हति अप+हृ–अनीयर् । १ अपहरणयोग्ये तानि वस्तूनि च स्मृतौ दर्शितानि । "द्विजोऽध्वगः क्षीणवृत्तिर्द्वाविक्षू द्वे च मूलके । आददानः परक्षेत्रान्न दण्डं दातुमर्हति" मनुः । "चणकव्रीहिगोधूम यवानां मुद्गमाषयोः । अनिषिद्धैर्ग्रहीतव्या मुष्टिरेका पथि स्थितैरिति" "तथैव सप्तमे भक्ते भक्तानि षडनश्नता । अश्वस्तनविधानेन हर्त्तव्यं हीनकर्म्मणः इति" च मनुः । "द्विजस्तृणैधःपुष्पाणि सर्व्वतः स्ववदाहरेदिति" याज्ञ० । "गोऽग्न्यर्थं तृणमेधांसि यच्चार्थे वीरुद्वनस्पतीनां पुष्पाणि स्ववदासीत फलानि चेति" गौ० । २ अपनेतव्ये च ।

**अपहर्त्तृ** त्रि० अप+हृ–तृच् स्त्रियां ङीप् । १ अपहारके । "निक्षेपस्यापहर्त्तारं तत्समं दापयेद्दममिति" मनुः । तृणि तु नलोकेत्यादिना पा० षष्ठीनिषेधात् कर्मणि द्वितीया ।

**अपहस्त** पु० अपसारणार्थः हस्तः । १ गलहस्ते अपसारणायोद्यतः हस्तोयस्य । २ गलहस्तेन अपसारिते त्रि० ।

**अपहस्तित** त्रि० हस्तेन अपसार्यते अप+हस्त+णिच्–कर्मणि क्त । १ गलहस्तादिना निरस्ते अपसारिते ।

**अपहार** पु० अप+हृ–घञ् । १चौर्य्ये २अपहरणे, ३अपनयने । "कर्णनासापहारेण भगिनी मे विरूपितेति" रामा० स्वाम्यनुपकारिधनव्यये "नापहारं स्त्रियः कुर्य्युः पतिरिक्थात् कथञ्चनेति" स्मृतिः । "अपहारश्च धनस्वाम्यनुपयोगे भवतीति" दायभागः ।४ अपचये, ५ हानौ, ६ सङ्गोपने च ।

**अपहारक** त्रि० अप+हृ–ण्वुल् । १ चौर्य्यकर्त्तरि २अपसारण कर्त्तरि ३सङ्गोपके ४स्थानान्तरापकर्षके च । "जालापहारकान् पक्षिण" इति हितो० । अपहारकभेदाश्च मनुना दर्शिताः "द्विविधांस्तस्करान् विद्यात् परद्रव्यापहारकान् । प्रकाशांश्चाप्रकाशांश्च चारचक्षुर्महीपतिः । प्रकाशवञ्चकास्तेषां नानापण्योपजीविनः । प्रच्छन्नवञ्चकास्त्वेते ये स्तेनाटविकादयः । उत्कोचकाश्चौपधिकावञ्चकाः कितवास्तथा । मङ्गलादेशवृत्ताश्च भद्राश्चैक्षणिकैः सह । असम्यक्कारिणश्चैव महामात्राश्चिकित्सकाः । शिल्पोपचारयुक्ताश्च निपुणाः पण्ययोषितः । एवमादीन् विजानीयात् प्रकाशांल्लोककण्टकान् । "निगूढचारिणश्चान्याननार्य्यानार्य्यलिङ्गिन" इति ।